National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 202-203
© 2025 NJHSR
www.sanskritarticle.com

**Soubhagya Ranjan Nanda**
Ph.D, Research Scholar,
Department of Vedabhashyam,
National Sanskrit University,
Tirupati, (A.P.)

**Correspondence:**
**Soubhagya Ranjan Nanda**
Ph.D, Research Scholar,
Department of Vedabhashyam,
National Sanskrit University,
Tirupati, (A.P.)

# पारस्करगृह्यसूत्रे संस्काराः

**Soubhagya Ranjan Nanda**

**प्रस्तावना -**

वैदिकसंस्कृतौ गृह्यसूत्राणां महत्त्वमत्यन्तं विशिष्टमस्ति। गृह्यसूत्राणि वैदिकधर्मस्य लौकिकानुष्ठानात्मकं पक्षं विवृण्वन्ति। तेषु पारस्करगृह्यसूत्रं शुक्लयजुर्वेदसम्बद्धं प्रमुखं गृह्यसूत्रं मन्यते। अस्मिन् ग्रन्थे मानवजीवनस्य जन्मतः मरणपर्यन्तं विविधाः संस्काराः विधानपूर्वकं निरूपिताः वर्तन्ते। संस्काराः न केवलं धार्मिकक्रियाः, अपि तु सामाजिक-नैतिक-आध्यात्मिकजीवनस्य आधारस्तम्भा अपि विराजते।

संस्कारशब्दः **'सं + कृ'** धातोः निष्पन्नः, यस्य अर्थः शोधनम्, परिष्कारः, परिमार्जनञ्च। इमे संस्काराः मानवस्य शारीरिकं मानसिकं च शोधनं कृत्वा तं धार्मिकजीवनाय योग्यं कुर्वन्ति। पारस्करगृह्यसूत्रे एते संस्काराः क्रमबद्धतया वर्णिताः सन्ति।

**संस्काराणां सामान्यपरिचयः –**

**गर्भाधानमृतौ पुंसः सवनं स्यन्दनात्परा।**
**षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च॥**
**अहन्येकादशे नाम चतुर्थे पासि निष्क्रमः।**
**षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्॥**
**एवमेन: (पाप) शर्म याति वीजगर्भसमुद्भवम्।**
**तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः॥**
**गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।**
**राज्ञामेकादशे सैके विशामेके यथाकुलम्॥**
**प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा।**
**ग्रहणान्तिकमित्येते केशान्तश्चैव षोडशे॥**[1]

धर्मशास्त्रेषु षोडशसंस्काराः प्रसिद्धाः सन्ति। एते संस्काराः गर्भाधानात् आरभ्य अन्त्येष्टिपर्यन्तं मानवजीवनस्य सम्पूर्णयात्रां सूचयन्ति। पारस्करगृह्यसूत्रेऽपि एतेषां संस्काराणां विस्तृतं विधानं दृश्यते। प्रत्येकसंस्कारस्य कालः, विधिः, मन्त्राः, फलानि च पृथक् पृथक् निरूपितानि सन्ति। ते यथा -

**१. गर्भाधानसंस्कारः –**

गर्भाधानसंस्कारः मानवजीवनस्य प्रथमः संस्कारः। अस्य संस्कारस्य उद्देश्यं सद्गुणयुक्तस्य सन्तानस्य उत्पत्तिः अस्ति। पारस्करगृह्यसूत्रे पतिपत्न्योः शुद्धिः, मानसिकतया सन्तानोत्पत्तेः कामना, तथा मन्त्रजपः निर्दिष्टः।

अयं संस्कारः धर्मपूर्वकं गृहस्थाश्रमस्य आरम्भं दर्शयति। गर्भाधानसमये उच्चरिताः मन्त्राः सन्तानस्य दीर्घायुः, बलम्, मेधां च कामयन्ते।

**इयमोषधी त्रायमाणा सहमाना सरस्वती**
**अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रतमिति।**[2]

सा भार्य्या यदि गर्भं न धारयेत् तदा पुष्यानक्षत्रेण युक्त चन्द्रमसि ताम् उपवासं कारयित्वा श्वेतपुष्प्याः कण्टकारिकायाः मूलं शिपाम् उत्थाप्य चतुर्थेऽहनि रजोदर्शनात् चतुर्थदिवसे ऋतुस्नातायां भार्य्यायां रात्रौ तन्मूलम् उदकेन पिष्ट्वा दक्षिणनासारन्ध्रे प्रक्षिपति भर्त्ता 'इयमोषधी' तिमन्त्रेण।

**२. पुंसवनसंस्कारः**

पुंसवनसंस्कारः गर्भस्थशिशोः आरोग्यं, बलं, बुद्धिं च अभिवर्धयितुं क्रियते। गर्भस्य तृतीयचतुर्थमासयोः अयं संस्कारः विधीयते। पारस्करगृह्यसूत्रे औषधिप्रयोगः, मन्त्रपाठः च अस्य संस्कारस्य मुख्यभागौ स्तः।

**पुरा स्पन्दत इति मासे द्वितीये तृतीये वा।**[3]

अतः हेतोः गर्भग्रहणात् द्वितीये तृतीये वा मासे पुंसवनं कर्त्तव्यम्।

रात्रौ उदकेन पिष्ट्वा, पूर्ववत् गर्भधारणार्थो- क्तवत् आसेचनं दक्षिणनासारन्ध्रे "हिरण्यगर्भः समवर्तताग्रे" अद्भ्यः सम्भृत इति एताभ्यां मन्त्राभ्याम्। मन्त्रपाठः-

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥**[4]
**अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।**
**तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे॥**[5]

**कुशकण्टकं सोमा शुच्चैके।**[6]

एके आचार्य्याः न्यग्रोधावरोहशुगैः सह कुशमूलं सोमलताखण्डं च प्रक्षिपन्ति। अस्मिन् पक्षे द्रव्यचतुष्टयस्य पेषणं भवति।

**३. सीमन्तोन्नयनसंस्कारः**

सीमन्तोन्नयनसंस्कारः गर्भिण्याः मानसिकशान्त्यै, गर्भरक्षणाय च विहितः। अस्मिन् संस्कारे पतिः पत्नीशिरसि केशविभागं करोति, मन्त्रैः सह। पारस्करगृह्यसूत्रे अस्य संस्कारस्य सामाजिकं धार्मिकं च महत्त्वं प्रतिपादितम्।

तच्च कर्म पुं सवनवत्  पुं सवनकर्मवत् पुं नक्षत्रे भवति।

**प्रथमगर्भे मासे षष्ठेऽष्टमे वा।**[7]

प्रथमगर्भे नाम गर्भादौ गर्भग्रहणप्रभृतिः षष्ठे अष्टमे मासे सीमन्तोन्नयनं कुर्य्यात्। गर्भान्तिरे अनियम इति कर्काचार्य्याः। अन्ये तु प्रथमगर्भ एवेति वदन्ति।

**४. जातकर्मसंस्कारः**

शिशोः जन्मसमये जातकर्मसंस्कारः विधीयते। अस्य संस्कारस्य उद्देश्यं नवजातस्य आयुः, आरोग्यं, बुद्धिं च सुनिश्चितं कर्तुम् अस्ति। मधु–घृतप्राशनं, मन्त्रपाठः च अस्य प्रमुखविधयः सन्ति।

**५. नामकरणसंस्कारः**

नामकरणसंस्कारः शिशोः सामाजिकपरिचयस्य आधारः भवति। पारस्करगृह्यसूत्रे शुभनक्षत्रे, शुभतिथौ नामकरणं कर्तव्यमिति निर्देशः अस्ति। नामस्य माध्यमेन व्यक्तित्वविकासः अपि संस्कृतौ स्वीक्रियते।

**६. निष्क्रमणसंस्कारः**

निष्क्रमणसंस्कारः शिशोः प्रथमं गृहात् बहिर्गमनं सूचयति। सूर्यचन्द्रदर्शनं, देवतानां स्मरणं च अस्य संस्कारस्य अङ्गानि सन्ति।

**७. अन्नप्राशनसंस्कारः**

अन्नप्राशनसंस्कारः शिशोः प्रथमं अन्नसेवनं दर्शयति। पारस्करगृह्यसूत्रे षष्ठे वा सप्तमे मासि अयं संस्कारः निर्दिष्टः। अन्नं जीवनस्य प्रतीकं मन्यते।

**८.चूडाकरणसंस्कारः**

शिरोमुण्डनरूपेण विधीयते। अस्य उद्देश्यं शारीरिकशुद्धिः, मानसिकविकासः च अस्ति।

**९. उपनयनसंस्कारः**

उपनयनसंस्कारः वैदिकशिक्षायाः प्रवेशद्वारम् अस्ति। यज्ञोपवीत-धारणं, गायत्रीमन्त्रोपदेशः च अस्य संस्कारस्य केन्द्रबिन्दुः। पारस्करगृह्यसूत्रे ब्रह्मचर्याश्रमस्य नियमाः स्पष्टतया उल्लिखिताः।

**१०. वेदारम्भसंस्कारः**

उपनयनानन्तरं वेदारम्भसंस्कारः विधीयते। अस्मिन् संस्कारे आचार्यः शिष्यं वेदाध्ययनाय प्रवर्तयति।

**११. केशान्तसंस्कारः**

केशान्तसंस्कारः युवावस्थायाः सूचकः संस्कारः अस्ति। अस्य माध्यमेन शिष्यस्य उत्तरदायित्वबोधः विकसितः भवति।

**१२. समावर्तनसंस्कारः**

समावर्तनसंस्कारः ब्रह्मचर्याश्रमस्य समाप्तिं सूचयति। विद्याध्ययनसमाप्त्यनन्तरं गृहस्थाश्रमप्रवेशस्य योग्यता अनेन संस्कारेण प्रकट्यते।

**१३. विवाहसंस्कारः**

विवाहसंस्कारः पारस्करगृह्यसूत्रस्य अत्यन्तं विस्तृतः विषयः अस्ति। सप्तपदी, पाणिग्रहणं, होमः इत्यादयः विधयः अस्मिन् संस्कारे वर्णिताः। विवाहः धर्मार्थकाममोक्षाणां साधनं मन्यते।

**१४. अन्त्येष्टिसंस्कारः**

अन्त्येष्टिसंस्कारः मानवजीवनस्य अन्तिमः संस्कारः। पारस्करगृह्यसूत्रे प्रेतकर्म, दाहविधिः, पितृयज्ञः च निरूपिताः सन्ति।

**उपसंहारः -**

एवं पारस्करगृह्यसूत्रे संस्काराः मानवजीवनस्य सम्पूर्णं चित्रं प्रस्तुतयन्ति। एते संस्काराः केवलं धार्मिककर्माणि न सन्ति, अपि तु संस्कृतमानवस्य नैतिक–सामाजिक–आध्यात्मिकविकासस्य आधाराः सन्ति। आधुनिककालेऽपि एते संस्काराः भारतीयसंस्कृतेः प्राणरूपेण स्थिताः इति निःसन्देहम्।

**संदर्भ ग्रन्थः -**

[1] या.स्मृ.आचाराध्याये - 2/11-14, 36

[2] पा.गृ.सू-१.१३.१

[3] पा.गृ.सू-१.१४.२

[4] का.सं - २५.१.१

[5] का.सं -३५.२.१७

[6] पा.गृ.सू-१.१४.४

[7] पा.गृ१.सू -.१५..३